# kulAnanda tantram

# કુલાનન્દ તન્ત્રમ્

## Document Information

Text title : kulAnandatantra

File name : kulaanandatantra.itx

Category : tantra, devii, devI

Location : doc_devii

Transliterated by : Michael Magee <ac70 at cityscape.co.uk> 1997

Proofread by : Mike Magee <ac70 at cityscape.co.uk>

Latest update : July 4, 2011

Send corrections to : Mike Magee <ac70@cityscape.co.uk>

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

kulAnanda tantram

# કુલાનન્દ તન્ત્રમ્

ૐ નમો ભૈરવાય ।
કૈલાસશિખરાસીનં દેવદેવ જગદ્ગુરુમ્ ।
પરિપૃચ્છત્યુમાદેવી એકાન્તે જ્ઞાનમુત્તમમ્ ॥ ૧॥

ભેદનિમુત્તમભેદં યથા દેહવ્યવસ્થિતમ્ ।
કથયસ્વ પુરાભેદં કુલાનન્દેષુ ચૂત્તમમ્ ॥ ૨॥

સ્થાનાન્તરવિશેષણ વિજ્ઞાનં કથયસ્વ મે ।
સદ્યઃ પ્રત્યકારકં યથા દેહે વ્યવસ્થિતમ્ ॥ ૩॥

પાશસ્તોભઞ્ચ બેધનઞ્ચ ધૂનનં કમ્પનં તથ ।
ખેચરં સમરસઞ્ચૈવ બલીપલિતનાશનમ્ ॥

સર્વં તત્તુ સુરેશ્વર કથયસ્વ મમ પ્રભો ॥ ૪॥

ભૈરવ ઉવાચ ।
શ‌ૃણુ દેવિ પ્રવક્ષ્યામિ પુરભેદં સમુત્તમમ્ ।
એતત્ કૌલિકં જ્ઞાનં કુલાનન્દે ચાષ્ટોત્તમઃ ॥ ૫॥

બ્રહ્મસ્થાને યત્ કમલં ચતુઃષષ્ટિદલાન્વિતમ્ ।
તત્રૈવ મનસા રોધ્ય લક્ષયેદ્દીપશિખાન્ વ્રતી ॥ ૬॥

પશ્યતિ સર્વદેહે તુ દિવ્યદૃષ્ટિર્વરાનને ।
તેન લક્ષિતમાત્રેણ જાયતે સિદ્ધિરુત્તમા ॥ ૭॥

તસ્યોપરિ નાભિમ્નદવદા [?] વિચક્ષણે ।
તથા ચોપરિતિષ્ઠતિ દેવો ભૈરવો જગત્પ્રભુઃ ॥ ૮॥

તસ્યાગ્રે મનસારોપ્ય દૃઢભૂતવિચક્ષણાઃ ।
જાયતે ધ્વનિભિર્જાતિં તત્ર મરુદ્વિશેષતઃ ॥ ૯॥

એતદ્ વિજ્ઞાનમાત્રેણ આવેષં જુરુતે ધ્રુવમ્ ।

જાયતે પરમં સ્થાનં નાત્ર કાર્ય્યવિચારણાત્ ॥ ૧૦॥

અથાન્યં પરમં દેવિ સદ્યઃ પ્રત્યાકારકમ્ ।
તં પ્રવક્ષ્યામિ હે દેવિ શ઼ૃણુષ્વાયતલોચને ॥ ૧૧॥

અઙ્ગુલ્યદ્વિતિયં દેવિ યત્ પૂર્વ્વં કથિતં મયા ।
તત્રૈવ સ્થાપયેદ્વિત્તં કથિતં જાયતે ધ્રુવમ્ ॥ ૧૨॥

અતીતાનાગતઞ્ચૈવ વર્ત્તમાનં તથૈવ ચ ।
તત્રૈવોત્પાદયેત્ સૃષ્ટિં તિવ્રજ્યોતિઃસમકૃતિઃ ॥ ૧૩॥

હૃદિસંસ્થકમલં હિત્વા મૂર્ધ્નિ યાન્ પ્રપૂરયેત્ ।
પાશસ્તોભં કરોત્યેવં યદિ વિશ્રમતે મનઃ ॥ ૧૪॥

અથાન્યં પરં દેવિ દિવ્યદૃષ્ટિ પ્રવર્ત્તતે ।
જ્વલજ્વાલનમધ્યસ્થં દ્વિજગ્રન્થિ નિરીક્ષયેત્ ॥ ૧૫॥

તત્રૈવ મનસા રોધ્ય ચૂલિકાગ્રન્તુ માનયેત્ પુનઃ ।
સૃષ્ટિં પ્રવર્ત્તન્તે દેવિ નાત્ર કાર્ય્યવિચારણાત્ ॥ ૧૬॥

દેવ્યુવાચ ।
તદ્બેધઞ્ચ શુદ્ધસારઞ્ચ હિતં મયા ન પ્રકાશિતમ્ ।
કથયસ્વ વિશેષણ યથા જાનામિ તત્ક્ષણાત્ ॥ ૧૭॥

ભૈરવ ઉવાચ ।
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ બેધસારં યથાક્રમમ્ ।
બ્રહ્મસ્થાને...પદ્મં ચતુઃષષ્ટિદલાન્વિતમ્ ॥ ૧૮॥

તત્રૈવોત્પાદયેત્ સૃષ્ટિઃ દણ્ડાકારાગ્નિતેજસા ।
ભેદયિત્વા મહાગ્રન્થિં દ્વિચક્રઞ્ચ તથૈવ ચ ॥ ૧૯॥

મૂર્ધ્નિ કમલસંસ્થાનં જ્વલનાકારં વિચિન્તયેત્ ।
ચલન્તં ભ્રામયેત્તેન નિયતં તુ મહિતલે ॥ ૨૦॥

બેધયે ગિરિવૃક્ષાણિ કિં પુનઃ ક્ષુદ્રજન્તવઃ ।
અથાન્યં પરમં દેવિ વિજ્ઞાનં ભદ્રકં શ઼ૃણુ ॥ ૨૧॥

ભ્રુવોશ્ચક્ષુર્મધ્યસ્થં ચ કાલાવુના [?] .... વિચિન્તયેત્ ।
યાવદ્વિશ્રમતે નિત્યં ભ્રમતે ચક્રવત્ શિરઃ ॥ ૨૨॥

દુરાશ્રવણવિજ્ઞાનં ભૂતદેતસ્ય [?] ચિન્તયેત્ ।

વામસ્ત્રોતં તુ યાવત્ તિવ્રતેજસમપ્રભમ્ ॥ ૨૩॥

દેવ્યુવાચ ।
બલીપલિતક્ષયં દેવ ત્વયા ખ્યાતં મમાગ્રતઃ ।
એતન્મે સંશયો દેવ કથયસ્વ મમ પ્રભો ॥ ૨૪॥

ભૈરવ ઉવાચ ।
શ◌ૃણુ દેવિ પ્રવક્ષ્યામિ યત્ સુરાણામપિ દુર્લ્લભમ્ ।
દ્વાત્રિંશતિદલં પદ્મં તિષ્ઠતિ તન્મૂર્ધ્નિ મધ્યતઃ ॥ ૨૫॥

તત્રૈવ ભાવયેદમૃતં કલાષોડશસમન્વિતમ્ ।
હૃચ્ચક્રં પાતયેદ્ધારં [?] યાવદાનાભ્જિમણ્ડલમ્ ॥ ૨૬॥

ચિન્તયેત્ કૃષ્ણવર્ણઞ્ચ ભેદં તુ સકલં પુરઃ ।
પલિતાસ્તમ્ભયેદ્દેવિ માસમેકેન સુવ્રતે ॥ ૨૭॥

અથાન્યં પરમં દેવિ ગુહ્યસંશયસ્થિતિકારકમ્ ।
યત્ર ચતુષ્પથસ્થાનં તત્ર સર્વાસુરાલયમ્ ॥ ૨૮॥

તત્રૈવ સ્થાપયેચ્ચિતં દિવ્યબાલપ્રવર્ત્તત [?] ।
અશ્રુતાં વદતે બાલાં....દિવ્ય વરાનને ॥ ૨૯॥

વિષપ્રહારં કુરુતે જ્વરવ્યાધિં વિનાશયેત્ ।
તતઃ પરતરં સ્થાનં તત્ર સર્વે પ્રવર્ત્તતે ॥ ૩૦॥

અથાન્યં પરમં દેવિ દુરાબેધં વદામ્યહમ્ ।
જ્વલજ્જ્વલનસંધ્યસ્થં તત્રૈવ લક્ષયેદ્દેવિ ॥ ૩૧॥

તં ત્રિતકોટિસમપ્રભા ઊર્ધ્વં શક્તિ નિપાતાન્યતઃ [?] ।
બેધયેદ્વિચક્ષણઃ બેધયિત્વા તુ તં લક્ષયેત્ ॥ ૩૨॥

જ્વલનાકાષ્ઠપ્રભાં ઉર્ધ્વશક્તિં ચક્રયિત્વ
અચલં ભ્રામયેત્ પુનઃ [?]
બેધયેત્ સા મનઃસહસ્રાણિ સમકાનિ તુ કા કથા ॥ ૩૩॥

એવં જ્ઞાત્વા વીરારોહે વિચરેત યથાસુખમ્ ।
દેવાસુર્મનુજાનાં દુર્લભો ભવતિ સાધકઃ ॥ ૩૪॥

દેવ્યુવાચ ।
ધૂનનં કમ્પનં દેવ યથાખ્યાતં મમાગ્રતઃ ।

તતશ્ચાપિ સંશયો દેવ કથયસ્વ મમ પ્રભો ॥ ૩૫॥

ભૈરવ ઉવાચ ।
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ ધૂનનં કમ્પનં સ્થિતમ્ ।
યા સા મહાવહા નાડી કુચેલ્યાકારસંસ્થિતા ॥ ૩૬॥

તત્રૈવોત્પાદયેત્ દૃષ્ટિર્દ્દણ્ડાકારસુતેજસા ।
હૃચ્ચક્ર... ... ... તિવ્રશક્તિ સુવિગ્રહા ॥ ૩૭॥

ધૂનનં કમ્પનં ચૈવ નાત્ર કાર્ય્યવિચારણાત્ ।
અથાન્યં પરમં દેવિ ખેચરત્વં શ઼ૃણુ પ્રિયે ॥ ૩૮॥

યા સા મહાવહા ના[ડી] કુણ્ડલ્યાકારસંસ્થિતા ।
પદદ્વન્દ્વગતા સા તુ મૂર્દ્ધ્નિસ્થં કમલં પુનઃ ॥ ૩૯॥

યા વીરતયે તજ્જ્વલનાકારં સુભાવયેદ્ બુધઃ ।
સર્વશક્તિતો મધ્યત ખેચરત્વ ભવેદ્ધ્રૈઃ
નવાહમભૃતં દદૈતઃ [?] ॥ ૪૦॥

અથાન્યં સમ્પ્રવક્ષ્યામિ મહાવ્યાપ્તિં વરાનને ।
યાવદ્...સ્થાનેષુ ખ્યાતા તસ્ય મયાગ્રતઃ ॥ ૪૧॥

તથૈવ મનસારોપ્યં નાસાગ્રે પવનમાનેન ।
મનસં તત્ત્વ બેધયિત્વા નિષ્કલં યોજયેદ્ બુધઃ ॥ ૪૨॥

મહાવ્યાપ્તિર્ભવેદ્દેવિ તવાહમનૃતં વદેત્ ।
અથાન્ય સમ્પ્રવક્ષ્યામિ યેન સિદ્ધિર્ભવેત્ ધ્રુવમ્ ॥ ૪૩॥

વર્ગાતીતસ્ય દ્વિતીયમનુલોમ ન સુવ્રતે ।
જ્વલનારૂઢં કૃત્વા ચતુર્થં સ્વરસંયુતઃ ॥ ૪૪॥

બિન્દુમસ્તકસમ્ભિન્નમાદૌ યોજયેદ્ બુધઃ ।
વર્ગાતીતં પુનર્દેવિ ષષ્તસ્વરવિભૂષિતઃ ॥ ૪૫॥

સ શિખે ખરબિન્દુસંયુક્તં યોગયેદ્દેવિ તત્ પુનઃ ।
યકારસ્ય પઞ્ચમં ગૃહ્યં તં તૃતીયસ્વરસમન્વિતમ્ ॥ ૪૬॥

સ્વરં દ્વિતીયસંયુક્તં કારયેત્ પુનઃ પ્રિયઃ ।
વર્ગસ્ય પ્રથમં બીજં સૃષ્ટરાદ્યતો યોજયેત્ ॥ ૪૭॥

એતદ્દેવિ સમાખ્યાતં કુલવિદ્યાસમન્વિતમ્ ।

નિત્યં તુ યોજયેદ્દેવિ એકચિત્તસ્તુ પણ્ડિતઃ ॥ ૪૮॥

તસ્ય સર્વા ભવેત્ સિદ્ધિઃ સર્વજ્ઞાનેષુ સુન્દરિ ।
ન ખેદયામિ કસ્ય ચિત્તં શિષ્યેઽપ્યુક્ત્વા વરાનને ॥ ૪૯॥

અથાન્યં પરમં દેવિ કામેન વિહ્વલારકમ્ ।
ભસ્ય મધ્યસ્થ ભગમધો હુતાશનમ્ ॥ ૫૦॥

પ્રેરિતઃ પવનઃ શક્ત્યા જ્વલનાકારતેજસા ।
વિસન્તુ ચિન્તયેદ્દેવિ સૃષ્ટિકમલન્તુ યાવત્ ॥ ૫૧॥

શ્રવણં ચિન્તયેદમૃતં તેજોમાર્ગેણ યોગિનિ ।
ભવન્તિ વિહ્વલા નાર્ય્યઃ ક્ષનમેકેન સુવ્રતે ॥ ૫૨॥

અથાન્યં પરમં દેવિ ફલપુષ્Pઆકથનં ચ ।
શ઼ૃણુયાત્ પર્માદેવિ અઘોરવિક્રમા ॥ ૫૩॥

આકર્ષયેદ્ બુધો વાયું પિણ્ડસ્થં રૂપણમુચ્યતે ।
ચક્ષુષા યોજયેદ્દેવિ ફલપુષ્પન્તુ ચિન્તયેત્ ।
તેજસાર્કર્ષયેત્ તુ...ચિત્તં સુસર્ય્યતઃ ॥ ૫૪॥

દેવ્યુવાચ ।
સર્વત્ર તુ મયા જ્ઞાનં ભાષિતં દેવ તત્ પુરા ।
અદ્યાપિ સંશયો દેવિ કથયસ્વ મમ પ્રભો ।
સંગમાન્મોક્ષહેતુકં *** *** ॥ ૫૫॥

ભૈરવ ઉવાચ ।
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ તત્ સુરૈરપિ દુર્લભમ્ ।
આસનં તુ સ્થિતં કૃત્વા...વિશ્વ અનિવૃત્તઃ ॥ ૫૬॥

અભાવં ભાવયેદ્દેવિ સર્વભાવવિવર્જિતમ્ ।
ચિત્તં તત્ર સ્થિતં કૃત્વા ખમધ્યે વિનિયોજયેત્ ॥ ૫૭॥

ભાવયેત્ સમરસં દેવિ પ્રભુભૃત્યં વિચક્ષણઃ ।
એતદ્વિજ્ઞાનમાત્રેણ ગિયતે તત્ર મધ્યતઃ ॥ ૫૮॥

દૂરાશ્રવણવિજ્ઞાનં બેધસ્તોભં મધ્યતઃ ।
આવેષં દર્શનં દૂરાત્ કમ્પસ્તોભં તથૈવ ચ ॥ ૫૯॥

પરકાયપ્રવેશેન સમ્પ્રવર્ત્તેત યોગિનઃ ।

... ... ...તદભ્યાસેન સુવ્રતે ॥ ૬૦॥

ઇતિ મત્સ્યેન્દ્ર-પાદાવતારિતં કુલાનન્દં સમાપ્તમિતિ ॥

શુભમસ્તુ સર્વજગતામ્ ।

Encoded by Mike Magee ac70@cityscape.co.uk

http://www.clas.ufl.edu/users/gthursby/tantra/kulanandtm

---

*kulAnanda tantram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*